International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(5): 45-48
© 2025 IJMH
www.themultijournal.com

Received: 23-09-2025
Accepted: 30-09-2025
Publish : 01-10-2025

**Dr. Ramesh Malakar**
Assistant professor,
Department of Sanskrit,
Jai narain vyas university,
Jodhpur, Rajasthan, 342011

**Correspondence:**
**Dr. Ramesh Malakar**
Assistant professor,
Department of Sanskrit,
Jai narain vyas university,
Jodhpur, Rajasthan, 342011

# भारतीयज्ञानपरम्परायां धर्मः तथा समाजोपयोगित्वम्

**Dr. Ramesh Malakar**

**प्रस्तावना –**

धर्मस्य प्रभावेण मनुष्याणां दुर्व्यसनं दीनता दुर्भाग्यम् इत्यादिदोषाः दूरीभवन्ति। मनुष्यश्च स्वजीवनस्य लक्ष्यं प्राप्नुवन्ति। अतः धर्म एव परमगतिः इत्युक्तम् - **धर्मो हि परमा गतिः**[1]। धर्मादेव मनुष्येषु प्रतापस्य प्रभावस्य नीतेः शौर्यस्य शक्तेः औदार्यस्य तथा सद्गुणानां प्रादुर्भावः भवति। यस्य हृदयं पूर्णरूपेण धर्मेण आप्यायितं तस्य कृते संसारे न किमपि दुर्लभं तिष्ठति- **न हि धर्माभिरक्तानां लोके किञ्चन दुर्लभम्**[2]। धर्म एव अस्मान् पापेभ्यः अपसार्य पुण्यं प्रति नयति। धर्मस्य पालनेन जनाः व्यक्तेः समाजस्य राष्ट्रस्य तथा सम्पूर्णविश्वस्य उन्नतिं कर्तुं शक्नुवन्ति।

**संकेतशब्दाः –** धर्मः, धार्मिकः, समाजः, राष्ट्रम्, मनुष्यः, ज्ञानम्, हितम्

धर्मस्य सहायेन मनुष्याः नरकादिदुःखमपि अतितरन्ति। धर्मस्य श्रेष्ठतां वदन् तैत्तिरीयारण्यके उक्तं -

**धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति।**
**धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्मात् धर्मं परमं वदन्ति॥**[3]

अतः नारदपुराणे धर्मरहितव्यक्तीनां कृते एतदेव उक्तं यत् यः धर्मात् रहितः सन् संसारेऽस्मिन् जायते तथा म्रियते तस्य जीवनं निरर्थकं भवति -

**यस्य धर्मविहीनानि दिनान्यायान्ति यान्ति च।**
**स लोहकारभस्त्रेव श्वसन्नपि न जीवति॥**[4]

धर्मशब्दः बहु गूढः तथा व्यापकश्च अस्ति। व्याकरणानुसारं धर्मशब्दः धृञ्धारणे इति धातोः उणादिसूत्रेण मन्प्रत्ययेन निष्पन्नो भवति। अनेन आधारेण धर्मः जगतः आधारः इति उक्तमस्ति। अस्य त्रिधा व्युत्पत्तिः सामान्यतः भवति-

1. ध्रियते लोकोऽनेनेति धर्मः
2. धरति धारयति वा लोकमिति धर्मः
3. ध्रियते लोकयात्रानिर्वाहार्थं यः स धर्मः

आशयस्तु अयमेव यत् धर्मः समस्तजगत् धारयति सर्वेषां धारयिता। यस्य परमसत्त्वेन निर्मितस्य नियमस्य अनुसारेण जगतः धारणपोषणं भवति तस्य अनुशासनस्य अनुरूपं जीवनयापनम् अथवा आचरणं यत् भवति तदेव धर्माचरणमित्युच्यते। यः जनः व्यक्तिं समाजं जनसामान्यं च धारयति स एव धर्मरूपेण धार्मिकः इत्युच्यते। तथाहि महाभारते उच्यते –

**सदा दान्तो जितक्रोधः सत्यसंधोऽनसूयकः॥**
**समाप्ते नियमे तस्मिन्नथ विप्रस्य धीमतः।**
**साक्षात् प्रतीस्तदा धर्मो दर्शयामास तं द्विजम्॥**[5]

आचार्यजैमिनेः अनुसारं वेदेषु प्रयुक्तानाम् अनुशासनानाम् अनुसारं जीवनयापनं धर्म इत्युच्यते। अथवा वेदेषु याः क्रियाः कर्तुं प्रेरिताः ता एव धर्मः। तस्य वचनं तु इत्थमस्ति- **चोदनालक्षणोऽर्थः धर्मः**[6] इति। वैशेषिकदर्शनकारः महर्षिः कणादः धर्मस्य फलानुसारं संज्ञां कृतवान् धर्मस्य इत्थं येन इहलौकिकं तथा पारलौकिकं कल्याणं प्राप्तुं शक्यते स धर्मः इति। उक्तं हि तेन यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः[7] इति।

योगशास्त्रानुसारं दुर्गतौ पतितानां जीवानाम् आश्रयं यतो हि ददाति धर्मः तदेव धर्मस्य धर्मत्वम्। तथाहि- **दुर्गतिप्रपतत्प्राणिपारणा धर्म उच्यते**[8] इति।

महाभारते धात्वर्थमाश्रित्य धर्मस्य लक्षणमेवमुक्तं धर्मः प्रजानां धारणं करोति। यः धारणं करोति स एव धर्मः। तथाहि महाभारते उक्तमस्ति-

**धारणाद्धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।**
**यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः॥**[9]

महाभारतस्य एकोनषष्ट्यधिकद्विशततमेऽध्याये युधिष्ठिरो धर्मस्य स्वरूपं पृच्छति। तदा भीष्मो धर्मस्य लक्षणं वदति –

**सदाचारः स्मृतिर्वेदास्त्रिविधं धर्मलक्षणम्।**
**चतुर्थमर्थमित्याहुः कवयो धर्मलक्षणम्॥**
**अपि ह्युक्तानि धर्म्याणि व्यवस्यन्त्युत्तरावरे।**
**लोकयात्रार्थमेवेह धर्मस्य नियमः कृतः॥**[10]

इदानीं सांख्यशास्त्रानुसारं धर्मस्य स्वरूपमुच्यते। वस्तुतः संसारेऽस्मिन् प्रत्येकं मनुष्यः यस्यां परिस्थितौ अस्ति ततः अभ्युन्नतिं प्राप्तुं सर्वेषामिच्छा भवति। मनुष्याणां इहलौकिकानां तथा पारलौकिकानाम् अभ्युन्नतेः यत् साधनं स एव धर्मः इत्युच्यते। तस्या विपरीतफलं यत् प्रददाति तत् मनुष्याणाम् अवनतेः कारणम्। स एव अधर्म इत्युच्यते। तथाहि ईश्वरकृष्णो भणति सांख्य-कारिकायाम्- **धर्मेण गमनमूर्ध्वं गमनमधस्तात् भवत्यधर्मेण।** [11]

वायुपुराणेऽपि समानः एव अंशः धर्मस्य विषये उक्तं -यत् धारणं करोति अर्थात् अधोगतेः रक्षति जीवनस्य च रक्षां करोति स एव धर्मः। यश्च मनुष्याणां जीवनस्य अधोगतेः अवनतेः च कारणं स एव अधर्मः।

**धारणाधृतिरित्यर्थाद्धातोर्धर्मः प्रकीर्तितः।**
**अधारणेऽमहत्त्वे च अधर्म इति चोच्यते।**[12]

धर्मस्य आशयः मानवसमाजस्य नियमनं तथा अवस्थायाः अनुरूपं जीवनयापनं कर्तव्यकर्म तथा आचारविचारस्य नियमादेः मार्गः। एतत्सर्वं धर्मस्य अन्तर्गताः। भविष्यपुराणानुसारं संसारेऽस्मिन् स्थावरजङ्गमेषु ये केऽपि प्राणिनः सन्ति तेषां धारयिता धर्मः। इयं काचित् अनादिशक्तिः-

**धर्मेण धार्यते सर्वं जगत्स्थावरजङ्गम्।**
**अनादिनिधना शक्तिर्नैषा ब्राह्मी द्विजोत्तमः॥**[13]

भागवतपुराणेऽपि धर्मः भगवतः एव उत्पन्ना काचित् शक्तिः। तत्रोक्तं भगवता उक्तं धर्मं न हि ऋषयः जानन्ति न वा देवाः न सिद्धपुरुषाः। इतोऽपि उक्तं यत् वेदेषु विहितानि कर्माणि एव धर्मः तथा निन्दितानि कर्माणि निषिद्ध्यन्ते यानि तानि अधर्मः।

**धर्मं तु साक्षाद्भवगवत्प्रणीतं**
**न वै विदुर्ऋषयो नापि देवाः।**[14] **इति।**

**वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।**
**वेदो नारायणः साक्षात्स्वयम्भूरिति शुश्रुम॥**[15]

कौटिल्यस्य अर्थशास्त्रानुसारं धर्मादेव समस्तलोकानां धारणा सम्भवति। तस्यार्थः यस्मिन् सम्पूर्णः लोकः आश्रितः तिष्ठति तद्व तत्त्वं धर्म इत्युच्यते। उक्तं हि– **धर्मेण धार्यते लोकः।**[16]

मनुस्मृतौ तु वेदः स्मृतिः सदाचारः स्वस्य च प्रियवस्तु इत्यादिविषयाः धर्मस्य लक्षणत्वेन उक्तम्। एतेषां पालनं मनुष्याणां धर्मः।

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्रोक्तं साक्षाद्धर्मस्य लक्षणम्॥**[17]

वाल्मीकिरामायणे श्रीरामः एव मूर्तिमान् धर्मस्य स्वरूपः इत्युक्तम्। **रामो विग्रहवान् धर्मः** इति। अत्रेदमवधेयं यत् अत्र कश्चन जनः मूर्तिमान् धर्मस्य स्वरूपः इत्युच्यते। कथमिति चेत् तस्मिन् ये गुणाः सन्ति ते एव धर्मस्य स्वरूपाः इति बोध्यम्। उत्तरकाण्डस्य प्रक्षिप्ते सर्गे धर्मस्य परिभाषा एवं कथिता वर्तते यतो हि धर्मः सम्पूर्णं जगत् धारयति अतः तस्य नाम धर्म इति। धर्म एव समस्तप्रजाः धारयति यतो हि स एव सम्पूर्णजगतः तथा त्रिलोकस्य आधारः। उक्तं हि-

**धारणाद् धर्ममित्याहुर्धर्मेण विधृताः प्रजाः।**
**यस्माद् धारयते सर्वं त्रैलोक्यं सचराचरम्॥**[18]

डां. पी.वी.काणेमहोदयः स्वस्य "धर्मशास्त्र का इतिहास" इत्यस्मिन् ग्रन्थे प्राचीनशास्त्राधारेण उक्तवान् धर्मस्य आशयः मानवस्य तादृशाः विशिष्टाधिकाराः तथा विशिष्टकर्तव्यानि यानि तं मनुष्यम् आर्यसमाजस्य सदस्यरूपेण पूर्णं कुर्वन्ति।

धर्मस्य सारः अत्यन्तः सूक्ष्मः। अयं भुक्तिमुक्तिप्रदाता तथा समस्तपापनाशकः। धर्मः व्यक्तेः समाजस्य राष्ट्रस्य च अभ्युन्नतेः मूलः। भारतीयसंस्कृतेः धर्म एव प्राणः। संसारे यावन्तः जीवाः विद्यमानाः तेषु धर्माधर्मयोः विवेकः केवलं मनुष्या एव कर्तुं शक्नुवन्ति। विवेककारणादेव मनुष्यः अन्यप्राण्यपेक्षया श्रेष्ठ इति मन्यते। तथाहि उक्तम्-

**आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥**[19]

अस्माकं शास्त्रेषु धर्मविहीनः मनुष्यः केवलं पशुसमानः इत्येव न उक्तम् अपि तु मृततुल्य इति मतम्। भागवतपुराणे उक्तं- येषां पुरुषाणां कर्मणा न हि धर्मस्य सम्पादनं भवति न वा वैराग्यस्य उत्पत्तिर्भवति न वा भगवत्सेवा भवति ते पुरुषाः मृतसमानाः।

**नेह यत्कर्म धर्माय न विरागाय कल्पते।**
**न तीर्थपदसेवायै जीवन्नपि मृतो हि सः॥**[20]

धर्मः सांसारिकसम्बन्धेषु वस्तुषु श्रेष्ठः। अतः मनुना उक्तं परलोके पिता माता पुत्रः स्त्री इत्येते न कोऽपि सहायतां कुर्वन्ति अपि तु धर्म एव सहायकः भवति।

**नामुत्र हि सहायार्थं पिता माता च तिष्ठतः।**
**न पुत्रद्वारा न ज्ञातिर्धर्मस्तिष्ठति केवलः॥**[21]

संसारे मनुष्यस्य यथार्थहितचिन्तकः तथा सुखदुःखेषु सहायकः भवति धर्मः। धर्म एव लोकान्तरेषु अस्माकं साहाय्यं करोति। धर्मेण

एव मनुष्यः अर्थं प्राप्नोति। धर्मेण सुखं च प्राप्नोति एवं सर्वमपि धर्मेण भवति इति कारणात् धर्म एव सारः।

**धर्मादर्थः प्रभवति धर्मात् प्रभवते सुखम्।**
**धर्मेण लभते सर्वं धर्मसारमिदं जगत॥**[22]

धर्मकारणादेव मनुष्यः अभ्युन्नतिं प्राप्नोति इति बहुधा उक्तम्। महाभारते उक्तं यत् धर्मवृद्धौ सत्यां सर्वेषां प्राणिनामुन्नतिः सम्भवति। धर्मस्य ह्रासे सति सर्वस्य क्षयो भवति। अतः धर्मस्य सर्वदा विशेषरूपेण वृद्धिः कार्या।

**वृषो हि भगवान् धर्मो यस्तस्य कुरुते ह्यलम्।**
**वृषलं तं विदुर्देवास्तस्माद्धर्मं विवर्धयते॥**
**धर्मे वर्धति वर्धन्ति सर्वभूतानि सर्वदा**
**तस्मिन् ह्रसति ह्रीयन्ते तस्मात् धर्मं न लोपयेत्॥**[23]

अस्माभिः कदापि धर्मस्य त्यागः न कर्तव्यः। यदा धर्मस्य उल्लङ्घनं भवति तदा स तत्कर्तारमपि मारयति। परन्तु यदा धर्मः मनुष्येण रक्ष्यते तदा धर्मोऽपि तस्य मनुष्यस्य रक्षां करोति। तथाहि भगवान् मुनिः वदति मनुसंहितायाम् -

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।**
**तस्माद्धर्मो न हन्तव्यो मानो धर्मो हतोऽवधीत्॥**[24]

अतः प्रत्येकं मनुष्यः कस्यामपि परिस्थितौ धर्मस्य उपेक्षां न कुर्यात् धर्माचरणं च कुर्यात्। उपनिषत्सु अपि उक्तं **धर्मान्न प्रमदितव्यम्**[25] इति। मनुष्यः स्वविज्ञानकारणात् जीवेषु शासन-समर्थः अस्ति। मनुष्यः सत्यासत्ययोः धर्माधर्मयोः विवेचनं च कर्तुं शक्नोति। मनुष्यातिरिक्ता ये केऽपि जीवाः सन्ति ते सर्वेऽपि स्वभाववद्धाः प्रकृत्यधीनाश्च। एते सर्वेऽपि भोगयोनिषु अन्तर्भूताः। किन्तु केवलं मनुष्य एव कर्मयोनिषु गण्यते।

मनुष्यः शुभाशुभकर्मकरणे स्वतन्त्रः अस्ति स्वविवेकवत्त्वात्। विवेककारणादेव मनुष्यः अन्यजीवेभ्यः श्रेष्ठः इति पूर्वमपि उक्तम्। महर्षिणा वाल्मीकिना अपि उक्तं यः अधर्माचरणं करोति स तु राक्षस एव यतो हि अधर्मः राक्षसाणां धर्मस्तु महात्मनां तथा देवतानाम्।

**धर्मो हि श्रूयते पक्षः अमराणां महात्मनाम्।**
**अधर्मो रक्षसां पक्षो ह्यसुराणां च राक्षस॥**[26]

वस्तुतः भारतीय संस्कृतौ अवतारवादस्य मुख्योद्देश्यमासीत् धर्मस्य रक्षा तथा अधर्मस्य विनाशः। भगवद्गीतायां स्वयं भगवान् कथयति-

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥**[27]

एवमेव मत्स्यपुराणेऽपि उक्तं यत् यदा पृथिव्यां धर्मः नष्टो भवति तदा भगवान् विष्णुः वृष्णिकुले जनिं लब्ध्वा धर्मं पुनः संस्थापयति-

**नष्टे धर्मे तथा जज्ञे विष्णुर्वृष्णिकुले प्रभुः।**
**कर्तुं धर्मस्य संस्थानमसुराणां प्रणाशनम्॥**

माङ्गलिकवस्तुषु कल्याणेषु च धर्मः मनुष्यजीवनस्य मुख्यः अङ्गः अस्ति। अतः धर्मस्य कदापि अवहेलनं न कार्यम्। अस्माकं परलोकस्य सहायको भवति धर्मः इति बहुधा उक्तम्। अतः मनुष्यैः धर्मस्य सञ्चयः कर्तव्यः। धर्मस्य साहाय्येन जनः नरकादिभ्यः अपि परित्रायते इति मनुः कथयति-

**तस्माद्धर्मं सहायार्थं नित्यं सञ्चिनुयाच्छनैः।**
**धर्मेण हि सहायेन तमस्तरति दुस्तरम्॥**[28]

धर्मे काचित् विलक्षणशक्तिरस्ति येन स अर्थात् कामात् च तं व्यवर्तयति। धर्मः कदापि व्यर्थो न भवति परन्तु कामः अर्थश्च भवति। धर्मेण मनुष्यः इहलोके परलोके समस्तसुखं प्राप्नोति। अतः धर्मेषु मनुष्याणाम् अनुरागः भवेत्। महाभारते उक्तं यत् अर्थकामयोः धर्मः एव उत्तमः। धर्मात्मा पुरुष एव इहलोके परलोके च सुखं भुङ्क्ते।

**उभयत्र सुखोर्दक इह चैव परत्र च।**
**उलब्ध्वा निपुणं धर्मं पापः पापेन युज्यते॥**
**न च पापकृतः पापान्मुच्यते केचिदापदि।**
**अपापवादी भवति यथा भवति धर्मकृत्।**
**धर्मस्य निष्ठा त्वाचारस्तमेवाश्रित्य भोत्स्यसे॥**[29]

धर्मः कुतः उत्पद्यते इति इदानीमालोच्यते। धर्मस्य उत्पत्तिः कर्मणः भवति। कर्म सदसद्भेदेन द्विविधं भवति। सत्कर्मणा पुण्यं जायते तथा असत्कर्मणा पापं जायते। किं पुण्यं तथा किं पापमिति सामान्येन उच्यते चेत् धर्मजन्यं पुण्यं तथा अधर्मजन्यं पापं भवति। पुण्यस्य फलं भवति सुखं तथा पापस्य फलं भवति दुःखम्। सुखभोगार्थं धर्माचरणं कर्तव्यमिति धर्मस्य प्रयोजनम्। वाल्मीकिरामायणे एवमुक्तं-

**धर्माद् राज्यं धनं सौख्यमधर्माद् दुःखमेव च।**
**तस्माद् धर्मं सुखार्थाय कुर्यात् पापं विसर्जयेत्॥**[30]

तथाहि महाभारते सत्यरूपधर्मो भण्यते –

**सत्यस्य वचनं साधु न सत्याद् विद्यते परम्।**
**सत्येन विधृतं सर्वं सर्वं मन्ये प्रतिष्ठितम्॥**
**अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक् पृथक्।**
**अद्रोहमविसंवादं प्रवर्तन्ते तदाश्रयाः॥**[31]

अर्थोपार्जनं यथा कठिनं तथैव धर्मार्जनमपि। अर्थस्य संरक्षणं यथा अर्जनापेक्षयापि कठिनं तथैव धर्मस्यापि। अत्यन्तप्रबलया अर्थकामवासनया चित्तं मलिनं भवति। महाभारते श्रीकृष्णः बलरामं प्रति वदति सत्पुरुषैः पालितः धर्मः अर्थकामाभ्यां संकुचितं भवति। लोभः अत्यन्तः भवति चेत् आसक्तिश्च अधिका चेत् धर्मः नश्यति तेन अर्थकामौ अपि नाशं गच्छतः। यः अर्थकामयोः निःस्पृहः सन् धर्मार्जनं यथोचितपद्धत्या करोति स धर्मरक्षणं करोति। तस्यार्थः अर्थकामौ प्रति यो न आसक्तः तस्यैव धर्मस्तिष्ठति। उक्तं हि कुमारसम्भवे कालिदासेन-

**अनेन धर्मः सविशेषमद्य मे त्रिवर्गसारः प्रतिभाति भाविनि।**
**त्वया मनोनिर्विषयार्थकामया यदेक एव प्रतिगृह्य सेव्यते॥**[32]

यथार्थधर्माचरणेन अर्थः कामश्च धर्म एव भवति। उदाहरणरूपेण राजा दिलीपः स्वीकर्तुं शक्यते। तस्य अर्थः कामः इति पुरुषार्थद्वयं धर्मरूपेण एव परिणतो जातः। तथाहि रघुवंशे-

**स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये।**
**अप्यर्थकामौ तस्यातां धर्म एव मनीषिणः॥**[33]

धर्माचरणेन एव मनुष्यः अभीष्टं प्राप्नोति। धर्मोन्नतिः आत्मोन्नतेः साधनं भवति। प्रार्थिनः साफल्यं सार्थक्यं तथा शोभा धर्माचरणेन एव जायते। अतः धर्मपालनेन मनुष्योपरि आगतस्य संकटस्य निवारणं सम्भवति। अतः स्वधर्मस्य परित्यागः न कदापि कर्तव्यः। धर्मबन्धनेन बद्धः राजा दशरथः स्वप्रियस्य पुत्रस्य रामस्य त्यागं कृतवान्। प्राणादपि प्रियं पुत्रं त्यक्तवान् किन्तु स्वप्रतिज्ञारूपं धर्मं न त्यक्तवान्। तथाहि रामायणे-

**स सत्यवचनात् राजा धर्मपाशेन संयतः।**
**विवासयामास सुतं रामं दशरथः प्रियम्॥**[34]

एवं भारतीयसंस्कृतौ धर्मस्य महत्त्वं न केवलं शास्त्रपङ्क्तिषु आसीत् अपि तु जनानां जीवने तस्य कथं प्रयोगः आसीत् इति रामायणस्य अयं प्रसङ्गः सम्यक् वक्ति। अत एव पुरुषार्थेषु धर्मस्य तथा माहात्म्यमङ्गीकृतमस्ति। मोक्षस्य साधनभूतः धर्म इति उक्तं किञ्च **धर्मादर्थश्च कामश्च** इत्यादिवचनेन अर्थकामौ अपि धर्मेणैव आगच्छतः इति इतरे त्रयः पुरुषार्थाः धर्मादेव सम्भवन्ति इति सिद्धम्। तेन धर्मस्य माहात्म्यं कियत् अस्ति इति साधितम्। उक्तं हि भविष्यपुराणे -

**धर्मात्सञ्जायते ह्यर्थो धर्मात्कामोऽभिजायते।**
**धर्मदेवापवर्गोऽयं तस्माद्धर्मं समाश्रयेत्॥**[35]

## उपसंहारः -

एवम्प्रकारेण प्राचीनग्रन्थेषु महर्षिभिः विचारकैः धर्मस्य अनेकाः संज्ञाः उक्ताः। धर्मस्य बहूनि व्याख्यानानि कृतानि। वस्तुतः धर्मस्य तथा विशालं व्यापकं च स्वरूपमस्ति तेन स केनचित् एकेन व्याख्यानेन परिसमापयितुं न शक्यते। तथापि निष्कर्षरूपेण एतत् वक्तुं शक्यते यत् यः समस्तलोकान् धारयति स एव धर्मः। केन ध्रियते इति चेत् महात्मभिः धार्मिकैः ध्रियते इति वक्तव्यम्। तथाहि शब्दकल्पद्रुमस्य वचनम्- **धरति लोकान् ध्रियते पुण्यात्मभिरिति।**[36]

## संदर्भगंथसूची -


१. श्रीमन्महर्षि-वेदव्यासः,विष्णुपुराणम्,सम्पादकः-आचार्यपञ्चानन-तर्करत्नः. कोलकाता,नवभारत-पावलिशार्स,१३९० (बङ्गाब्दः)।
२. कुमारसम्भवम्, कालिदासः, पाण्डुरङ्ग-जावजी, वासुदेव-लक्ष्मण-शर्मा-पणशीकरः, सञ्जिवनी – मल्लिनाथः, निर्णयसागर-यन्त्रालयः, 1927
३. रघुवंशम्- कालिदासः, प्रकाशकः - हितचिन्तकः, संपादकः – बालकृष्णशास्त्री, संजीविनी टीका, हितचिन्तक-यन्त्रालयः, 1931
४. श्रीमद्वाल्मीकिरामायणम्, रामस्वामिअय्यर्, स्कोलर्-प्रेस्, 1940
५. दशोपनिषत्, संपादकः - सी. कुन्हन-राजा, पब्लिसर् -ए. के. सीताराम-शास्त्री, अड्यार्-पुस्तकालयः
६. मनुस्मृतिः - मनुः, पाण्डुरङ्ग-जावजी, निर्णयसागर-यन्त्रालयः, 1922
७. श्रीभाविष्यमहापुराणम्, खेमराजश्रीकृष्णदासः, गोविन्द-शास्त्री, श्री-वेङ्कटेश्वर-प्रेस्, 1896
८. श्रीमद्भागवतपुराणम्. श्रीधरस्वामिविरचितया भावार्थबोधिनी-नाम्ना संस्कृतटीकया समुपेतम्. संस्कृता-आचार्यजगदीशलाल-शास्त्री. दिल्ली, मोतीलाल बनारसीदास, १९८८।


## पाद टिप्पणी : -

1 वा.रा. ७।३।१०
2 वा.रा. ७।७०।३३
3 तै.आ. १०।६३
4 ना.पु. ४।१८
5 महा.भा.शा.प. १९९।१८-१९ (पृष्ठाङ्कः - ५९७)
6 जै.सू. १।१।२
7 वै.सू. १।१।२
8 यो.सू. २।११
9 महा.भा.शा.प. १०९।११ (पृष्ठाङ्कः - ३४३)
10 महा.भा.शा.प. २६।३-४ (पृष्ठाङ्कः - ७८८)
11 सा.का. ४४
12 वायु.पु. ५९।२८
13 भविष्य.पु. द्वि.ख. १।२६
14 श्री.भा.पु. ६।३।१९
15 श्री.भा.पु. ६।१।४०
16 अर्थ.शा. २।३४
17 मनु.स्मृ. २।१२
18 वा.रा. ३।३७।१३
19 हित.उप. १।२४
20 श्री.भा.पु. ३।२३।५६
21 मनु.स्मृ. ४।२३९
22 वा.रा. ३।९।३०
23 महा.भा.शा.प. ९०।१६-१७ (पृष्ठाङ्कः - २८६)
24 मनु.स्मृ. ८।१५
25 तै.उप. १।११।१
26 वा.रा. ६।३५।१३
27 श्री.गी. ४।७-८
28 मनु.स्मृ. ४।२४२
29 महा.भा.शा.प. २४९।४-६ (पृष्ठाङ्कः - ७८८)
30 वा.रा. ७।१५।२३
31 महा.भा.शा.प. २४९।१०-११ (पृष्ठाङ्कः - ७८८)
32 कु.स. ५।३८
33 रघु.वं. १।२५
34 वा.रा. १.१.२३
35 भविष्य.पु. २.१.२४
36 शब्द.कल्प.द्रुम. भाग २ पृ. ७८३